International Journal of Advanced Academic Studies

**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
www.allstudyjournal.com
IJAAS 2020; 2(1): 239-242
Received: 09-11-2019
Accepted: 21-12-2019

**डॉ0 पवन कुमार**
ग्राम –फेंट, पोस्ट–बासोपट्टी,
जिला–मधुबनी, बिहार,
भारत

**Corresponding Author:**
**डॉ0 पवन कुमार**
ग्राम –फेंट, पोस्ट–बासोपट्टी,
जिला–मधुबनी, बिहार,
भारत

# संस्कृतकाव्येषु वाल्मीकेरूपजीव्यत्वोपपादनम्

**डॉ0 पवन कुमार**

## प्रस्तावना

आदिकवि– प्राचेतस– महर्षिवाल्मीकिना विरचितमादिकाव्यं रामायणम् विद्वज्जनमानसोल्लासं विद्याधनम् । आम्नायादन्यत्र नूतनं छन्दसामवतरणं जगतिं प्रकाशते। तपः स्वाध्याय परिपूतात्मा ब्रह्मर्षि–वाल्मीकिदेवर्षि–नारदमुखात् सकलगुणनिधानस्य मर्यादापुरूषोत्तम–श्रीरामभद्रस्य चारित्रिक–वैशिष्ट्यं समाकर्ण्य तद्वर्णने दत्तावधानो बभूव। एकदा माध्यन्दिन् स वनाय तमसानदीमनुप्राप्तः। तत्र एकेन क्रूरव्याधेन वध्यमानं क्रौञ्चम्, तत्पार्श्वे तत्सहचरीम्। प्रिय–विरह–शोकेन विलयन्ती मुहर्मुहर्भूमौ लुठन्तीं विलोक्य करूणार्द्रचेताः प्राचेतसमहर्षिरत्यन्त–शोकाकुलोऽभवत्। करूणावरूणालयस्य ब्रह्मर्षरन्तः करणान्तर्गत–शोकोच्छ्वासः तन्मुखादकस्मात् देवीवाग्रूपेण परिणतः आनुष्टुपेन छन्दसा–

''मा निषद् प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्।। [1]

इत्येवं रूपेण प्रकटितोऽभवत्।

एवं हि आनायास–श्लोक– व्याहरणात्– ''किमिदं– व्याहृतम्'' इति। चिन्ताकुलचेतामहर्षिर्व्याजहार पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः। यथा –

शाकोर्त्तस्य प्रवृत्ते मे श्लोके भवतु नान्यथा।'' [2]

इति एवं चिन्तयन्तं किंकर्तव्यविमूढं महर्षिमुपसंगम्यभूतभावनः पद्मयोनित्रेह्या प्रावोचत्ऋषे, प्रबुद्धोऽसि वागात्मनि ब्रह्मणि। तद् ब्रूहि रामचरितम्। अव्याहृत –ज्योतिराषं ते चक्षुः प्रतिभातु। आद्यः कविरसि [3] एवमुक्त्वाऽन्तर्हिते ब्रह्मणि समाहितमना महर्षि प्राचेतसः मनुष्येषु सर्वप्रथमं शब्दब्राह्मणस्तादृशं विवर्तमितिहासं रामायणं विरचयाञ्चकार। एवं हि महर्षि–वाल्मीकि –प्रणीतं रामायणमिदम्। कुशलवाक्यां तन्त्री–लय–संवीत गीतं सीतमस्ति। पुरातनमपि क्षणे–क्षणे नवनवायमानं रमणीयताया अपूर्वं रूपमस्ति। अपृथगयत्न– निर्वत्यैः रसध्वनि–प्रकर्षोत्कर्षकैः शब्दार्थालंकारैर्विभूषितम्, माधुर्योजः प्रसादाद्यैगुणैर्गुम्फितम्, रम्यरीति– सद्वृत्ति–विभ्राजितम्, अपूर्वनिर्माणकौशलेन कमनीयम्, सचेतश्चेतश्चमत्कारि – चारूरचना – वैचित्र्येण रमणीयम्, स्वविषयमाधुर्येण परमास्वाद्यम्, चारूरचना – वैचित्र्येण रमणीयम्, स्वविषय–माधुर्येण परमास्वाद्यम्, सहृदयं–हृदयाह्लादकम्, विश्वविश्रुतमादि– महाकाव्यं सर्वत्र विजयतेतराम्।

वाल्मीकिरामायणस्य आदिकाव्यत्वम्,काव्यान्तरबीजत्वं च–

इदं हि रामायणमादिकवेर्वाल्मीकेरादिकाव्यमीति न केवलम् पूर्वोक्तेन ''क्रौञ्चद्वन्द्व–बियोगोत्थः शोकः श्लोकत्वमागतः'' इति प्रसगेंनैव निर्धार्यते, अपि तु महर्षि– व्यासः–प्रणीतैर्महाभारत–पुराणादिर्भिरपि निश्चीयते। काव्यान्तरस्य बीजरूपमेतदेव रामायणं समधीत्य महर्षि श्रीकृष्णद्वैपायनव्यासेन

पुराणमहाभरतादीनि निरमयिषत इति प्रतिपादयति वृहद्धर्मपुराणम्–

पठ रामायणं व्यास, काव्य–बीजं सनातनम्।
यत्र राम–चरित्रं स्यात् तदहं तत्र भक्तिमान्। [4]
रामायणं पठितं मे प्रसन्नोऽस्मिन कृतस्त्वया।
करिष्यामि पुराणानि महाभारतमेव च।। [5]

स्कन्दपुराणस्योत्तरखण्डे नारद–सनतकुमार–संवादे पञ्चसु अध्यायेषु विस्तरेण वर्णितं वाल्मीकि–रामायणमाहात्म्यं विषयामिमं स्पष्टं प्रकटयति। महाभारते पर्वणि रामोपाख्यानम् रामायणाधारितमेव। द्रोणपर्वणिच–

'' अपि चायं पुरा गीतः श्लोको वाल्मीकिना भुवि।
न हन्तव्याः स्त्रियश्चेतियद् ब्रवीषि प्लवंम्।। [6]
सर्वकालं मनुष्येण व्यवसायवता सदा।
पीदाकरमभित्राणां यच्च कर्तव्यमेव तत्।।

इत्यादिना महर्षि– वाल्मीकेर्नामोल्लेखपुरस्सरम् रामायण–युद्धकाण्डस्य एकाशीतितमाध्यायस्य अष्टाविंशश्लोकः अविकलरूपेण उपन्यस्त उपलभ्यते।

अग्निपुराणे पञ्चमाध्यायात् त्रयोदशाध्यायपर्यन्तम् नारद– वाल्मीकि–संवाद [7] निर्देश –पुरस्सरम् रामायणकथासारः संगृहीतः समुपलभ्यते। महर्षिव्यासदेवेन स्कन्दपुराणे वैष्णवखण्डे वैशाखमहात्म्ये सप्तदशाध्यायतो विंशतितमाध्यायपर्यन्तम्, आवन्त्यखण्डे अवन्तीक्षेत्रमहात्म्ये चतुर्विंशाध्याये, प्रयासखण्डे अष्टसप्तत्यधिक–द्विशततमाध्याये च ब्रह्मर्षिवाल्मीकेर्जीवनवृत्तम् श्रद्धातिशयेन उपन्यस्तम्। अध्यात्मरामायणस्य अयोध्याकाण्डे षष्ठसर्गे तस्य पूर्वजन्मवृत्तान्तो विस्तरेण वर्णितः।

वाल्मीकिरामायण–युद्धकाण्डे युद्धवर्णनस्य न केवलमर्थतः अपि तु शब्दतोऽपि आनुपूर्व्येण वर्णनम् मार्कण्डेय–पुराणान्तर्गत–देवी–माहात्म्ये सप्तशतीस्तोत्रे महिषासुर–रक्तबीज–निसुम्भ–शुम्भादि युद्धवर्णने प्राप्यते। तथाहि–

''उत्पत्य चैनं तरसा तलेनोरस्मताडयत्। [8]
देव्यास्तं चापि सा देवी तलेनोरस्यताडयत।। [9]
सच्छिन्नघन्वा विरथो हताश्वो हतसारथिः। [10]

एवं विधानि अनेकानि उदाहरणानि रामायणस्य उपजीत्यत्वं प्रदर्शयन्ति।

रामायणबालकाण्डे–

''समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा।
सोऽनुव्याहारणाद् भूयः शोकः श्लोकत्वमागतः।।'' [11]

इति श्लोकमुपजीव्यैव समादरणपुरस्सरम् रघुवंशे महाकवि कालिदासः–

तामभ्यगच्छद्रूदितानुकारी मुनिः कुशोध्मारहणाय यातः।
निषादविद्वाण्डज– दर्शनोत्थः श्लोकत्वमापद्यतयस्य शोकः।।

इति विरचयाञ्चकार। बौद्धजातकेषु अन्यतमं प्रसिद्धं दशरथजातकम्, न केवलं रामायणकथामेव वर्णयति अपि तु उत्तरकाण्डस्य एकं श्लोकं पालिभाषायां रूपान्तरितम् उद्धरति।

एवञ्च रामायण–कथा–वर्णन–परायणः परवर्तिनो महाकवयः रामायण–रूपं सनातन बीजमेव पल्लवयन्ति, विकासयन्ति, प्रकाशयन्ति च।

रामायणस्य संरचना–

सप्तकाण्डात्मकं रामायणमिति जगति सर्वत्र प्रथितम्।

वाल्मीकिरामायणस्य सप्तकाण्डानि आधृत्यैव अध्यात्मरामायणे, रामचरितमानसादौ च तन्नामकान्येव सप्तकाण्डानि विलसन्ति। मूलरामायणे सप्तषु काण्डेषु पञ्चशतसंख्याकाः सर्गाः, चतुर्विंशतिसहस्रमिताः श्लोका आसन्निति निर्दिशति। बालकाण्डस्य चतुर्थ–सर्गे–

प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवान् ऋषिः।
चकार चरितं कृत्स्नं विचित्रपदमर्थवत्।।
चतुर्विंशत् सहस्राणि श्लोकामानुक्तवानृषिः।
तथा सर्गशतान् पञ्च षट् काण्डानि तथोत्तरम्।
कृत्वा तु तन्माप्राज्ञः सभविष्यं सहोत्तरम्।।
काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्।
पौलस्त्य–वघमित्येवं चकारं चरितं–व्रतः।
एतच्च कृत्सनं रामायणं वेदोपबृंहणार्थाय।।

महर्षि वेदेषु परिनिहिक्तौ मेधाविनौ अग्राह्यत। ततश्च गान्धर्वतत्वज्ञौ स्थान–मूर्च्छन–कोविदौ मधुर–स्वरौ तौ यमजौ भ्रातरौ–

पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभि [12] रन्वितम्।
जातिभिः सप्तभिर्युक्त [13] तन्त्री–लय–समन्वितम्।
रसैः श्रृंार–करूण–हास्य–रौद्र–भयानकैः।
वीरादिभि रसैर्युक्तं काव्यमेतद्गायताम्।। [14]

बालकाण्डस्य प्रथमसर्गान्ते–

एतदाख्यानमामुष्यं पठन् रामायणं नरः।
स पुत्र–पौत्र सगणः प्रत्य स्वर्गे महीयते।।

एवमेव उत्तरकाण्डस्यान्ते–

एतदाख्यानमायुष्य [15] सभविष्यं सहोत्तरम्।
कृतवान् प्रचेतसः पुत्रस्तद्ब्रह्माप्यन्वमन्यत।। [16]

इत्यनयोः श्लोकयोर्थकारो गायत्र्यक्षरम्। एतच्च गायत्र्याश्च स्वरूपं तद् रामायणानुत्तमम् [17] इत्येतेन सुस्पष्टम्।
एवञ्च उपक्रमे 'वेदोपबृंहणार्थय' इति कथनस्य उपसंहार–वाक्येन सर्वथा समर्था समर्थनात् रामायणं गायत्रीविवरणमिति विस्पष्टम्। अतश्च गायत्री–विवरणात्मकेऽस्मिन् रामायणे गायत्र्याश्चतुर्विंशत्यक्षरानुसारम् चतुर्विंशतिसहस्रमिताः श्लोकाः लोकं–प्रसिद्धिः संगच्छते।

एवमेव उपक्रमे बालकाण्डे–

कृत्वा तु तन्माहाप्राज्ञः सभविष्यं सहोत्तरम्।

एतादाख्यानमायुष्यं सभविष्यं सहोत्तरम्। इत्युभयत्र सभविष्यं सहोत्तरम् रामायणं महर्षिः कृतवान् इति स्पष्टोक्त्या सम्पूर्ण सप्तकाण्डात्मकं रामायणं महर्षिवाल्मीकिप्रणीतम् इति सिध्यति। अयम् अर्णवः सागरः जगतः संसारस्य विगमस्य नाशस्य यः घस्रः दिनं तत्र घस्मरः सर्वसंहारकः सहस्रभानुः सूर्यस्तस्य प्रभया तेजसा परिक्वथितः अतितरां पाकं प्रापितः तत पिण्डितः पिण्डाकारतां नीतः सन् लवण कूटम् लवणराशिरेव क्षणम्भूत् अथ कालरुद्रानले संहारकरुद्राग्नौ ज्वलति सति चटचटत् इति एतादृशशब्दपूर्वकं स्फुटन् यावत् न भवतिस्म अदृश्यतां गतोऽभूत्। अयं सागरः प्रलयदिने प्रागत्युग्रसूर्यप्रभया क्वथ्यमानः सन् लवणपिण्डाकारं लभते अथ सोऽपि लवणपिण्डो रुद्रनेत्राग्नौ ज्वलति सति चटचटशब्दं कृत्वा समाप्तिं याति, इत्यर्थः।
जलनिधिमध्यवर्त्तिनः सागरमध्यस्थस्य। लौपोतस्य लौरूपवहित्रस्य। जम्बूद्वीपेन भारतेन उपसंयमनं बन्धनं तत्र शृला लौहरज्जुः इव। मेदिनीनन्दिनि पृथ्वीतनये।
पतितः भूमौ गतः यः पौलस्त्यस्य रावणस्य जगद्विजयकेतुदण्डः विकृविजयपताका तदनुकारी तत्तुल्यः यावत्पौलस्त्यो जीवतिस्म तावत्तस्य केतुदण्डोऽप्युन्नत आसीन्मृते तस्मिन्नसौ पतित इत्याशयेनेदं विशेषणम्। ककुत्स्थकुटुम्बो रघुकुलम् तस्य यद् दुःखं सीताहरणजं तस्य संविभागो तुल्यांशविभागे दायादस्य भागग्राहिणः अंशहरस्य। रघुवंशसमदुःखस्य तन्मित्रतया सुग्रीवस्य विशेषणमिदम्। कीर्त्तनमयः कीर्त्तिस्वरूपः।
बन्धप्ररोहणमहौषधम् स्थापनोत्पादकम्। अत्र सेतौ बध्यमान एव मम हृदये भवद्दर्शनप्रत्याशा जातेति भावः। विकृम्भरासम्भवे धरातनये।
अपां भर्त्ता समुद्रः यथा दूरापाति दूरागतम् यत् त्रिदशयुवतीनेत्रम् व्योमचारिदेवांनानयनम् तेन सुलभां सुखं प्रमेयाम् हारावलिवलयलक्ष्मीम् धरित्रीकण्ठगतस्रगुपमां वितनुते, तथा अयं सेतुः माणिक्यशिखरैः स्फटिकशिखरैः कनकग्रावशिखरै अशून्यात्मा पूरितावयवः महानायकः मध्यमणिरिव प्रभवति। अयमाशयः–यथामुं सागरं सुदूरव्योमदेशसञ्चारिण्यो देवबाला दूरपातिना नेत्रेण पृथिव्या हारवलयं प्रतियन्ति तथाऽयं महासेतुरपि तत्तन्मणिमयप्रस्तरघटितावयवतया हारवलयगतमध्यमणिरिव प्रतीयत इति। 'नायको नेतरि श्रेष्ठे हारमध्यमणावपि' इत्यनेकार्थध्वनिमञ्जरी।
शैलानां सेतुनिर्माणायाहृतानां पर्वतानां प्रवेशात् समुद्रवारि मध्ये प्रवेशात् प्रचलीभवद्भिः चञ्चलतां गतैः कल्लोलकूटैः तरंराशिभिः अभिताडितानाम् आहतानाम् अत एव निवृत्य पराङ्मुखीभूय अचलगामिनीनाम् यत एव पर्वतादायातास्तत्पर्वताभिमुखमेव गच्छन्तीनाम् नदीनाम् पर्वतो वानामपि अम्भोधिः सागर एव प्रभव उद्गमस्थानम् आसीत्, नदीनां पर्वताः प्रभवाः समुद्र गम्य इति नियमः, परमत्र सागरे शैलप्रवेशात् कल्लोलताडनेन परावृत्य नद्यः सागरात्पर्वतानेव प्रस्थिता इति सागर एव उत्पत्तिस्थानतया प्रतीयत इत्यर्थः।
तथा सेतुश्ररद्धया तादृशेन सेतुनिर्माणानुरागेण उत्कलितैः उत्कण्ठापरवशैः कपिभिन्नलादिभिर्वानरैः निक्षिप्तानां यतः कुतः दानीय घृतानां शिखरिणां पर्वतानाम् प्रतिष्ठया स्वान्तरवस्थानेन वद्धिष्णुः बर्धनशीलः, क्षणं कियन्तं कालं यावत् नदीभिः सह प्रतिवहन् प्रतिकूलदिशा गच्छन् अथ अनन्तरं समुत्खातानां सेतुकरणः। उत्पाटितानां क्षोणीधराणां पर्वतानां विवरणां पूर्त्तेः व्यतिकरेण सम्बन्धेन प्रमृष्टाहौरः अपगतजलवृद्धिगवः अपांनिधिः सागरः तदवस्थः प्राचीनां दशां गत इति स्मरसीत्यर्थः। पर्वतागमेन जले बर्धमाने समुद्रो नदीभिः सहैव प्रतिकूलप्रवाहो जातः, परन्तु यदोतपाटितपर्वतमूलस्थलविवरभरणे तदीयं जलं शोषितं तदासौ पुनरपि प्रकृतिं प्रपन्न इति स्मरसीत्यर्थः। वाक्यार्थः स्मरतेः कर्म। 'कुहरं सुषिरं विलम्' इत्यमरः। [18] भवच्चरितचित्रशालिकायाम् भवत्कीर्त्या चित्रितायां भवद्यशः कथाभृतायामस्मदन्तर्वृत्तौ। भवत्कीर्त्तिकथापूरित इत्यर्थः।

## निष्कर्ष

एवञ्च संस्कृतसाहित्याकाशे वाल्मीकिरामायणकाव्यादारभ्य अधुना पर्यन्तं रचित काव्य–खण्डकाव्य–गीतिकाव्यादिनाञ्च प्रायः उपजीव्यत्वेन रामायणस्यस्यास्य स्थानं सर्वोपरि विद्यते। वालमीकिरामायणं अखिलविश्वे सर्वमान्यो प्रतिष्ठितश्च ग्रन्थो विद्यते।

## संदर्भ सूची

1. वाल्मीकिरामायणम्'–1/2/15।
2. तत्रैव–1/2/18।
3. तत्रैव–1/2/30।
4. बृहद्धर्मपुराणे,प्रथखण्डे–30/47,51 ।
5. तत्रैव–1/30/55।
6. महाभारत–द्रोणपर्वणि–143/67–68।

7. रामायणमहं वक्ष्ये नारदेनोदितं पुरा। वाल्मीकये यथा तद्वत् पठितं भुक्ति–मुक्तिदम्।।
8. अग्निपुराणे–5/1।
9. रामायणे– 6/67 ।
10. सप्तशती–10/20 ।
11. तत्रैव 3/6/10/18
12. रामायणे–1/2/40।
13. वा. रामायणे–1/4/1–7।
14. तत्रैव–वेदोपबृंहणार्थाय तावभ्राह्यत प्रभुः –14/16 एवमेव।
15. अध्यात्मरानायणेऽपि।
16. द्रुत–मध्य–विलम्बितैः।
17. निषादर्षभ–गान्धार–षड्ज–मध्यम–धैवताः। पञ्चमश्चेत्यमी सप्त तन्त्री कण्ठोत्थिता स्वराः।। इति स्वरैः।
18. वा. रामायणे–7/11/11।
19. अनर्घराघवम्– 7/20।